**तुरि(री)** स्त्री तुर–इन् "इगुपधात् कित्" उणा० कित्त्व वा ङीप्। तन्तुवायस्य काष्ठादिनिर्मिते वयनसाधने (माकु) द्रव्ये "तन्त्रटचातुरीतुरीति" नैष० तुरीतन्तुसंयोगः जगदीशः २त्वरायुक्तमात्रे। "ऋचा न्टपतीव तुर्य्ये" ऋ० १०।१०६। "तुर्य्यै त्वरमाणायै संभ्रमवत्यै जनतायै" भा०।

**तुरीप** त्रि० तूर्णमाप्नोति व्याप्नोति तूर्ण+आप–क पृषो०। तूर्णं व्यापके। "त्वष्टा तुष्टा तुरीपोऽद्भुत इन्द्राग्नी पुष्टिवर्द्धनी" यजु० २१।२०। तुरीपः तूर्णमाप्नोति तुरीपः" वेददी०। "तन्नस्तुरीपमद्भुतम्" १।१४२।१ "तुरीपं तूर्णं व्यापि" भा० मुद्रितपुस्तके तुरीयमिति पाठः मुद्रादोषात् भाष्य-व्याख्यादर्शनात् तुरीपपाठस्यैवोचितत्वात्।[अतुरीयीत्।

**तुरीय** गतौ भ्वा० सक० सेट् गतिकर्म्मसु निघण्टुः। तुरीयति

**तुरीय** त्रि० तुरीय–अच् चतुर्णां पूरणः चतुर्+छ आद्यलोपश्च। १गतियुक्ते २चतुर्णां पूरणे च। ३तारके। "ततस्तुरीयमथ पोषयित्नुः" ऋ० २।४।८। "तुरीयं तारकम्" भा०। "गुहा त्रीणि निहितानेङ्गयन्ति" "तुरीयं वाचो मनुष्या वदन्ति" ऋ० १।१६४।४५। अस्यार्थः भाष्ये बहुधा मतभेदेन दर्शितः किन्तु वैखरीरूपा वाक् चतुर्थीति निष्कृष्टार्थः तथा हि

"परा पश्यन्ती मध्यमा वैखरीति चत्वारि। एकैव नादात्मिका वाक् मूलाधारादुदिता सती परेत्युच्यते। नादस्य च सूक्ष्मत्वेन दुर्निरूपत्वात् सैव हृदयगामिनी पश्यन्तीत्युच्यते योगिभिर्द्रष्टुं शक्यत्वात्। सैव बुद्धिं गता विवक्षां प्राप्ता मध्यमेत्युच्यते मध्ये हृदयाख्ये उदीयमानत्वान् मध्यमायाः। अथ यदा सैव वक्त्रे स्थिता ताल्वोष्ठादिव्यापारेण बहिर्निर्गच्छति तदा वैखरीत्युच्यते एवं चत्वारि वाचः पदानि परिमितानि। मनीषिणो मनसः स्वामिनः स्वाधीनमनस्का ब्राह्मणा वाचोऽस्य शब्दब्रह्मणोऽधिगन्तारो योगिनः पदानि चत्वारि पदानि विदुः। जानन्ति। तेषु मध्ये त्रीणि परादीनि गुहानिहितानि हृदयान्तर्वर्त्तित्वात्। तुरीयं तु पदं वैखरीसंज्ञकं मनुष्याः सर्वे वदन्ति। ४सर्वाधारभूतेऽनुपहितचैतन्ये परब्रह्मणि "वनतज्जलतदवच्छिन्नाकाशयोर्जलाशयजलतद्गतप्रतिबिम्बाकाशयोर्वा आधारानुपहिताकाशवदनयोरज्ञानतदुपहितचैतन्ययोराधारभूतं यदनुपहितचैतन्यं तत् तुरीयमित्युच्यते" वेदान्तसा०। आधारस्यासौ अनुपहितस्यासौ आकाशस्य स तथा तद्वदिति यावत्। यद्यप्याकाशस्य वनाश्रयत्वं जलाश्रयत्वं वा नास्ति तदनारम्भकत्वात् तथाप्याकाशमन्तरेण तयोः स्थित्यनुपपत्तेस्तदाधारत्ववचनमिति द्रष्टव्यम्। अस्य चैतन्यस्य तुरीयत्वं विश्वतैजसप्राज्ञापेक्षया द्रष्टव्यम्। "शिवमद्वैतं तुरीयं मन्यन्ते" वेदान्त सारधृता श्रुतिः

"तुरीयो यज्ञो यत्र हव्यमिति"। यजु० १७। ५७ तुरीयः चतुर्थः "आदौ यजुर्जपः ततो होत्रा ऋचां पठनम् ब्रह्मणोऽप्रतिरथजपः एवं च तुरीयो होमः तथा च श्रुतिः "अध्वर्युः पुरस्ताद्यजूंषि जपति होता पश्चादृचोऽन्वाह ब्रह्मा दक्षिणतोऽप्रतिरथं जपत्येष एव तुरीयो यज्ञ" इति वेददी०। "तुरीयः ब्रह्महत्यायाः क्षत्रियस्य वधे स्मृतः" मनुः स्वार्थे क। तत्रार्थे। "भगिन्यश्च निजादंशात् दत्त्वांशन्तु तुरीयकम्" याज्ञ०।

**तुरीयवर्ण** पु० कर्म्म०। शूद्रे हला०।

**तुरुष्क** पु० तुर–उसिक् स्वार्थे क इणुसोरिति षत्वम्। १गन्धद्रव्यभेदे (शिलारस) अमरः।२म्लेच्छजातिभेदे मेदि० ३पारस्यभाषाभेदे च हेमच० ४श्रीवासद्रवे विश्वः।

**तुर्फरी** त्रि० तृफ–हिंसायाम् बा० अरि। हन्तरि। "सृण्येव जर्भरी तुर्फरीतू नैतोशेव तुर्फरी पर्फरीका" ऋ० १०।१०६।६ "तृफ तृम्फ हिंसायाम्। अस्मात् जलस्य तुर्फरीतारावित्यस्य पृषोदरादित्वाद्वर्णविकारः। यद्वास्माद्बाहुलकादौणादिकोऽरीतुप्रत्ययः। उक्तं चात्र नि० १३।५। "द्विविधा सृणिर्भवति भर्त्ता च हन्ता च तथाश्विनौ चापि भर्त्तारौ जर्भरी भर्त्तारावित्यर्थस्तुर्फरीतू हन्तारावित्यादि। जर्भरिशब्दे ३०६२ पृ० दृश्यम्।

**तुर्फरीतु** त्रि० तृफ–बा० अरीतु पृषो०। हन्तरि तुर्फरीशब्दे दृश्यम्।

**तुर्य्य** त्रि० चतुर्+पूरणे यत् च भागस्य लोपः। चतुर्थे। "एक एवेश्वरस्तुर्य्यः भगवान् स्वाश्रयः परः" भाग० ६।५।१२। "तुर्य्यशब्दस्य वा एकदेशिसमासः तुर्य्यं भिक्षायाः तुर्य्यभिक्षा पक्षे षष्ठीसमासः भिक्षातुर्य्यम्।

**तुर्य्यगोल** पु० सि०। "दलीकृतं चक्रमुशन्ति चापं कोदण्डखण्डं खलु तुर्य्यगोलम्" शि० उक्ते कालज्ञानार्थे यन्त्रभेदे

**तुर्य्यवाह्** पु० तुर्य्यं चतुर्थं वर्षं वहति वह–ण्वि। चतुर्वर्षे पशौ। "तुर्य्यवाट् वयोऽनुष्टुप्छन्दः" यजु० १४।१८ "तुर्य्यवाट् तुर्य्यं चतुर्थं वर्षं वहतीति पशुः अनुष्टुप् छन्दो भूत्वोत्क्रान्तं तुर्य्यवाहं पशुं प्रजापतिर्वयसाऽग्रहीत्। तुर्य्यवाहं वयसाप्नोदनुष्टुप्भूत्वा तुर्य्यवाह उच्चक्रमुरिति" शत० ब्रा० ८।२।४।१५ स्मृतेः" वेददी०।